# কুমারীকবচং রুদ্রযামলোত্তরতন্ত্রান্তর্গতম্

{॥ কুমারীকবচং রুদ্রযামলোত্তরতন্ত্রান্তর্গতম্ ॥}

আনন্দভৈরব উবাচ --

অথাতঃ সম্প্রবক্ষ্যামি কুমারীকবচং শুভম্ ।

ত্রৈলোক্যং মঙ্গলং নাম মহাপাতকনাশকম্ ॥ ১॥

পঠনাদ্ধারণাল্লোকা মহাসিদ্ধাঃ প্রভাকরাঃ ।

শক্রো দেবাধিপঃ শ্রীমান্ দেবগুরুর্বৃহস্পতিঃ ॥ ২॥

মহাতেজোময়ো বহ্নির্ধর্মরাজো ভয়ানকঃ ।

বরুণো দেবপূজ্যো হি জলানামধিপঃ স্বয়ম্ ॥ ৩॥

সর্বহর্তা মহাবায়ুঃ কুবেরঃ কুঞ্জরেশ্বরঃ ।

ধরাধিপঃ প্রিয়ঃ শম্ভোঃ সর্বে দেবা দিগীশ্বরঃ ॥ ৪॥

ন মেরুঃ প্রভুরেকায়াঃ সর্বেশো নির্মলো দ্বয়োঃ ।

এতৎকবচপাঠেন সর্বে ভূপা ধনাধিপাঃ ॥ ৫॥

ত্রৈলোক্যমঙ্গলকুমারীকবচম্ --

প্রণবো মে শিরঃ পাতু মায়া সন্দায়িকা সতী ।

ললাটোদ্র্ধ্বং মহামায়া পাতু মে শ্রীসরস্বতী ॥ ৬॥

কামাক্ষা বটুকেশানী ত্রিমূর্ত্তির্ভালমেব মে ।

চামুণ্ডা বীজরূপা চ বদনং কালিকা মম ॥ ৭॥

পাতু মাং সূর্যগা নিত্যং তথা নেত্রদ্বয়ং মম ।

কর্ণযুগ্মং কামবীজং স্বরূপোমাতপস্বিনী ॥ ৮॥

রসনাগ্রং তথা পাতু বাগ্দেবী মালিনী মম ।

ডামরস্থা কামরূপা দন্তাগ্রং কুঞ্জিকা মম ॥ ৯॥

দেবী প্রণবরূপাঽসৌ পাতু নিত্যং শিবা মম ।

ওষ্ঠাধরং শক্তিবীজাত্মিকা স্বাহাস্বরূপিণী ॥ ১০॥

পাযান্মে কালসন্দষ্টা পঞ্চবাযুস্বরূপিণী ।

গলদেশং মহারৌদ্রী পাতু মে চাপরাজিতা ॥ ১১॥

ক্ষ্রৌং বীজং মে তথা কণ্ঠং রুদ্রাণী স্বাহযান্বিতা ।

হৃদযং ভৈরবী বিদ্যা পাতু ষোডশ সুস্বরা ॥ ১২॥

দ্বৌ বাহূ পাতু সর্বত্র মহালক্ষ্মীঃ প্রধানিকা ।

সর্বমন্ত্রস্বরূপং মে চোদরং পীঠনাযিকা ॥ ১৩॥

পার্শ্বযুগ্মং তথা পাতু কুমারী বাগ্ভবাত্মিকা ।

কৈশোরী কটিদেশং মে মাযাবীজস্বরূপিণী ॥ ১৪॥

জঙ্ঘাযুগ্মং জযন্তী মে যোগিনী কুল্লুকাযুতা ।
সর্বাঙ্গমম্বিকাদেবী পাতু মন্ত্রার্থগামিনী ॥ ১৫॥

কেশাগ্রং কমলাদেবী নাসাগ্রং বিন্ধ্যবাসিনী ।
চিবুকং চণ্ডিকা দেবী কুমারী পাতু মে সদা ॥ ১৬॥

হৃদযং ললিতা দেবী পৃষ্ঠং পর্বতবাসিনী ।
ত্রিশক্তিঃ ষোডশী দেবী লিঙ্গং গুহ্যং সদাবতু ॥ ১৭॥

শ্মশানে চাম্বিকা দেবী গঙ্গাগর্ভে চ বৈষ্ণবী ।
শূন্যাগারে পঞ্চমুদ্রা মন্ত্রযন্ত্রপ্রকাশিনী ॥ ১৮॥

চতুষ্পথে তথা পাতু মামেব বজ্রধারিণী ।
শবাসনগতা চণ্ডা মুণ্ডমালাবিভূষিতা ॥ ১৯॥

পাতু মানে কলিঙ্গে চ বৈখরী শক্তিরূপিণী ।
বনে পাতু মহাবালা মহারণ্যে রণপ্রিযা ॥ ২০॥

মহাজলে তডাগে চ শত্রুমধ্যে সরস্বতী ।
মহাকাশপথে পৃথ্বী পাতু মাং শীতলা সদা ॥ ২১॥

রণমধ্যে রাজলক্ষ্মীঃ কুমারী কুলকামিনী ।

অর্দ্ধনারীশ্বরা পাতু মম পাদতলং মহী ॥ ২২॥

নবলক্ষমহাবিদ্যা কুমারী রূপধারিণী ।

কোটিসূর্যপ্রতীকাশা চন্দ্রকোটিসুশীতলা ॥ ২৩॥

পাতু মাং বরদা বাণী বটুকেশ্বরকামিনী

ইতি তে কথিতং নাথ কবচং পরমাদ্ভুতম্ ॥ ২৪॥

কুমার্যাঃ কুলদাযিন্যাঃ পঞ্চতত্ত্বার্থপারগ

যো জপেত্ পঞ্চতত্ত্বেন স্তোত্রেণ কবচেন চ ॥ ২৫॥

আকাশগামিনী সিদ্ধির্ভবেত্তস্য ন সংশযঃ ॥ ২৬॥

বজ্রদেহী ভবেত্ ক্ষিপ্রং কবচস্য প্রপাঠতঃ ।

সর্বসিদ্ধীশ্বরো যোগী জ্ঞানী ভবতি যঃ পঠেত্ ॥ ২৭॥

বিবাদে ব্যবহারে চ সঙ্গ্রামে কুলমণ্ডলে ।

মহাপথে শ্মশানে চ যোগসিদ্ধো ভবেত্ স চ ॥ ২৮॥

পঠিত্বা জযমাপ্নোতি সত্যং সত্যং কুলেশ্বর

বশীকরণকবচং সর্বত্র জযদং শুভম্ ॥ ২৯॥

পুণ্যব্রতী পঠেন্নিত্যং যতিশ্রীমান্ভবেদ্ ধ্রুবম্

সিদ্ধবিদ্যা কুমারী চ দদাতি সিদ্ধিমুত্তমাম্ ॥ ৩০॥

পঠেদ্যঃ শৃণুযাদ্বাপি স ভবেৎকল্পপাদপঃ ।

ভক্তিং মুক্তিং তুষ্টিং পুষ্টিং রাজলক্ষ্মীং সুসম্পদাম্ ॥ ৩১॥

প্রাপ্নোতি সাধকশ্রেষ্ঠো ধারযিত্বা জপেদ্যদি ।

অসাধ্যং সাধযেদ্বিদ্বান্ পঠিত্বা কবচং শুভম্ ॥ ৩২॥

ধনিনাঞ্চ মহাসৌখ্যধর্ম্মার্থকামমোক্ষদম্ ।

যো বশী দিবসে নিত্যং কুমারীং পূজযেন্নিশি ॥ ৩৩॥

উপচারবিশেষেণ ত্রৈলোক্যং বশমানযেত্ ।

পললেনাসবেনাপি মৎস্যেন মুদ্রযা সহ ॥ ৩৪॥

নানাভক্ষ্যেণ ভোজ্যেন গন্ধদ্রব্যেণ সাধকঃ ।

মাল্যেন স্বর্ণরজতালঙ্কারেণ সুচৈলকৈঃ ॥ ৩৫॥

পূজযিত্বা জপিত্বা চ তর্পযিত্বা বরাননাম্ ।

যজ্ঞদানতপস্যাভিঃ প্রযোগেণ মহেশ্বর ॥ ৩৬॥

স্তুত্বা কুমারীকবচং যঃ পঠেদেকভাবতঃ ।

তস্য সিদ্ধির্ভবেত্ ক্ষিপ্রং রাজরাজেশ্বরো ভবেত্ ॥ ৩৭॥

বাঞ্ছার্থফলমাপ্নোতি যদ্যন্মনসি বর্ততে ।

ভূর্জপত্রে লিখিত্বা স কবচং ধারযেদ্ হৃদি ॥ ৩৮॥

শনিমঙ্গলবারে চ নবম্যামষ্টমীদিনে ।

চতুর্দশ্যাং পৌর্ণমাস্যাং কৃষ্ণপক্ষে বিশেষতঃ ॥ ৩৯॥

লিখিত্বা ধারযেদ্ বিদ্বান্ উত্তরাভিমুখো ভবন্ ।

মহাপাতকযুক্তো হি মুক্তঃ স্যাত্ সর্বপাতকৈঃ ॥ ৪০॥

যোষিদ্বামভুজে ধৃত্বা সর্বকল্যাণমালভেত্ ।

বহুপুত্রান্বিতা কান্তা সর্বসম্পত্তিসংযুতা ॥ ৪১॥

তথাশ্রীপুরুষশ্রেষ্ঠো দক্ষিণে ধারযেদ্ ভুজে ।

এহিকে দিব্যদেহঃ স্যাত্ পঞ্চাননসমপ্রভঃ ॥ ৪২॥

শিবলোকে পরে যাতি বাযুবেগী নিরামযঃ ।

সূর্যমণ্ডলমাভেদ্য পরং লোকমবাপ্নুযাত্ ॥ ৪৩॥

লোকানামতিসৌখ্যদং ভযহরং শ্রীপাদভক্তিপ্রদ ।

মোক্ষার্থং কবচং শুভং প্রপঠতামানন্দসিন্ধূদ্ভবম্ ।

পার্থানাং কলিকালঘোরকলুষধ্বংসৈকহেতুং জয ।
যে নাম প্রপঠন্তি ধর্মমতুলং মোক্ষং ব্রজন্তি ক্ষণাত্ ॥ ৪৪॥

॥ ইতি শ্রীরুদ্রযামলে উত্তরতন্ত্রে মহাতন্ত্রোদ্দীপনে

কুমার্যুপচর্যাবিন্যাসে সিদ্ধমন্ত্রপ্রকরণে
দিব্যভাবনির্ণযে নবমপটলে কুমারীকবচম্ সম্পূর্ণম্ ॥

॥ পটলঃ ৯ ॥

From Digital Library at http://muktalib5.org

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Kumari Kavacham Lyrics in Bengali PDF
% File name : kumArIkavacha.itx
% Category : kavacha
% Location : doc_devii
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : From Digital Library at http://muktalib5.org
% Proofread by : Final proofread DPD
% Description-comments : RudrayAmala uttaratantra paTalaH 9
% Latest update : April 5, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%

% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website